# राष्ट्रियसंस्कृतविश्वविद्यालयःतिरुपतिः ,

## विद्यावारिधिप्रवेशपरीक्षा -2020

## प्रश्नपत्रम्

**विषयः - न्यायशास्त्रम्** **पूर्णाङ्काः -100**

1 भारतीयसर्वप्राचीनसभ्यता का ?

A सिन्धुसभ्यता B वैदिकसभ्यता

C रामायणकालिकसभ्यता D सुमेरियासभ्यता

2 भारतीयशासकेषु कः चाणक्यं राजप्रासादात् बहिश्चकार ?

A चन्द्रगुप्तः B धननन्दः

C बिन्दुसारः D चन्द्रनन्दः

3 भारतीयसमाजे गर्भाधानसंस्कारादनन्तरं कः संस्कारः कार्यते ?

A सीमन्तोन्नयनम् B पुंसवनम्

C चूडाकर्म D जातकर्म

4 ब्रह्मयज्ञः कं सूचयति ?

A स्वाध्यायम् B देवपूजनम्

C ब्रह्मार्चनम् D ईश्वरभक्तिम्

5 भारतसंविधाने कस्यामनुसूच्यां संस्कृतभाषायाः स्थानं वर्तते ?

A नवम्याम् B अष्टम्याम्

C दशम्याम् D षष्ठ्याम्

6 दूरदर्शने प्रसारितसंस्कृतकार्यक्रमस्य नाम किम् ?

A संस्कृतभारती B वार्तावली

C संस्कारः D संस्कृतवार्ताः

7 संस्कृतभाषा देवभाषा इति केनोक्तम् ?

A दण्डिना B मम्मटेन

C विश्वनाथेन D कह्लणेन

8 श्रमणधर्मस्य सम्बन्ध कैः भवति ?

A बौद्धैः
B जोराष्ट्रैः
C सिक्खैः
D इस्लामैः

9 सांख्यदर्शनाधारेण अधोलिखितेषु किं तत्त्वम् अहङ्कारस्य विकाररूपं भवति ?

A बुद्धितत्त्वम्
B इन्द्रियतत्त्वम्
C प्रकृतितत्त्वम्
D पुरुषतत्त्वम्

10 "द्वादशलक्षणी"ति कस्य दर्शनस्य नाम ?

A जैनदर्शनस्य
B पूर्वमीमांसादर्शनस्य
C उत्तरमीमांसादर्शनस्य
D न्यायदर्शनस्य

11 पद्मपुराणस्य कस्मिन् खण्डे शकुन्तलोपाख्यानं प्राप्यते ?

A सृष्टिखण्डे
B भूमिखण्डे
C स्वर्गखण्डे
D पातालखण्डे

12 आगमशास्त्रे "बेरम्" नाम किम् ?

A मूर्तिः
B मण्डलम्
C मुद्रा
D मन्त्रः

13 मातृकासु "पुष्पिका" (Colophon) कुत्र भवति ?

A अध्यायान्ते
B ग्रन्थारम्भे
C ग्रन्थमध्ये
D पादटिप्पण्याम्

14 "सहस्रशीर्षं देवम्" – अनेन वाक्येन आरब्धं सूक्तं किम्?

A पुरुषसूक्तम्
B अघमर्षणसूक्तम्
C नारायणसूक्तम्
D विष्णुसूक्तम्

15 आयुर्वेदस्य मूलं कस्मिन् वेदे अस्ति?

A ऋग्वेदे
B यजुर्वेदे
C सामवेदे
D अथर्ववेदे

16 त्रिष्टुप् छन्दसि अक्षराणां सङ्ख्या का?

A 32
B 36
C 44
D 40

17 सर्वलघुः इति को गणः?

A जगणः
B मगणः
C नगणः
D सगणः

18 कौ छायाग्रहौ स्तः?

A शनिभौमौ
B राहुकेतू
C सूर्यचन्द्रौ
D गुरुशुक्रौ

19 विंशोत्तरीदशायां कति वर्षाणि भवन्ति?

A 120
B 100
C 108
D 20

20 सूर्यग्रहस्य मित्रग्रहः कः?

A गुरुः
B बुधः
C शुक्रः
D शनिः

21 अष्टादशसाहस्रीसंहिता इति कस्य पुराणस्य नामान्तरम्?

A श्रीमद्भागवतस्य
B वराहपुराणस्य
C वामनपुराणस्य
D ब्रह्मवैवर्तपुराणस्य

22 रामायणे स्वयम्प्रभागुहावर्णनं कस्मिन् काण्डे वर्तते?

A सुन्दरकाण्डे
B अरण्यकाण्डे
C अयोध्याकाण्डे
D किष्किन्धाकाण्डे

23 काव्यप्रकाशे उपमानोपमेययोः विपर्यासे कोऽलङ्कारः?

A अनन्वयः
B विभावना
C विशेषोक्तिः
D उपमेयोपमा

24 साहित्यदर्पणे साकल्येन लक्षणायाः कति भेदाः स्वीकृताः?

A षोडश
B चतुर्विंशतिः
C अशीतिः
D षट्

25 "अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलङ्कृती"॥
इत्येवं मम्मटकाव्यलक्षणे कः प्रश्नमुत्थापितवान्?

A जयदेवः
B विश्वनाथः
C विद्यानाथः
D भोजदेवः

26 प्रेजते इत्यत्र क: सन्धि: ?

A गुण: B पररूपम्

C वृद्धिः D पूर्वरूपम्

27 एतेषु साधुरूपं किम् ?

A सुगन्नीश: B सुगन्णीश:

C सुगणीश: D सुगण्णीश:

28 अहश्च रात्रिश्च अनयो: समाहार: इति विग्रहे किं रूपम् ?

A अहोरात्रम् B अहोरात्रि:

C अहोरात्र: D अहोरात्री

29 अधिहरि इत्यत्र क: समास: ?

A बहुव्रीहि: B अव्ययीभाव:

C तत्पुरुष: D कर्मधारय:

30 सुसिक्तम् इत्यत्र सु इत्यस्य का संज्ञा ?

A उपसर्ग: B उपपदम्

C कर्मप्रवचनीय: D अव्ययम्

31 भवत् - शब्दस्य षष्ठीबहुवचने किं रूपम् ?

A भवतानाम् B भवताम्

C भवतः D भवत्सु

32 अधिकरणं कतिविधम् ?

A द्विविधम् B त्रिविधम्

C चतुर्विधम् D पञ्चविधम्

33 त्वं लिखसि इत्यस्य वाच्यपरिवर्तनं कुरुत ।

A त्वया लिखति B त्वं लिखत

C त्वया लिख्यते D त्वया लिख्यसे

34 पक्व: इत्यत्र क: कृत्प्रत्यय: ?

A व B क्त

C अच् D तृच्

35 व्यासस्य अपत्यम् इत्यर्थे किं रूपम् ?

A वैयासकि:　　B व्यासकि:

C व्यासपुत्र:　　D व्यासि:

36 भीधातो: लटि प्रथमपुरुषैकवचनं रूपं किम् ?

A भेति　　B बभेति

C बिभेति　　D भयति

37 श्वन् शब्दस्य द्वितीयाबहुवचनं किम् ?

A श्वानम्　　B शुन:

C शुनान्　　D श्वान:

38 कण्ठेकाल: इत्यत्र क: समास: ?

A सप्तमीतत्पुरुष:　　B असमर्थसमास:

C बहुव्रीहि:　　D द्विगु:

39 मेघदूतकाव्यस्य मल्लिनाथविरचितव्याख्याया: नाम किम् ?

A जीवातुः　　B बालप्रिया

C सञ्जीवनी　　D घण्टापथः

40 मधुराविजयम् इति चरित्रग्रन्थस्य कर्ता कः ?

A गङ्गादेवी　　B आर्यादेवी

C रामभद्राम्बा　　D पद्मगुप्तः

41 आनन्दवर्धनमतेन महाभारते अङ्गिरसः कः?

A वीरः　　B करुणः

C शान्तः　　D रौद्रः

42 वस्तुनः उत्तरोत्तम् उत्कर्षः कस्मिन् अलङ्कारे स्वीकृतः ?

A उपमालङ्कारे　　B रूपकालङ्कारे

C सारालङ्कारे　　D सूक्ष्मालङ्कारे

43 पुराणेषु कस्मिन् पुराणे संस्कृतालङ्कारविषयकं तत्त्वम् उपनिबद्धम् ?

A पद्मपुराणे　　B अग्निपुराणे

C गरुडपुराणे　　D नारदपुराणे

44 ‘मरणं प्रकृतिः शरीरिणाम्’ इत्याद्युक्तिः कस्य ?

A अश्वघोषस्य
B भासस्य
C कालिदासस्य
D भारवेः

45 ‘मेघदूते चटुलशफरोद्वर्तनप्रेक्षितानि’ इति कस्याः नद्याः विशेषणम् ?

A निर्विन्ध्या
B रेवा
C गम्भीरा
D सरस्वती

46 ‘वाक्यं रसात्मकं काव्यम्’ – उक्तिरियं कस्य ?

A अभिनवगुप्तस्य
B आनन्दवर्धनस्य
C मम्मटाचार्यस्य
D विश्वनाथस्य

47 महाभारतस्य कस्मिन् पर्वणि शकुन्तलोपाख्यानं वर्णितमस्ति ?

A वनपर्वणि
B भीष्मपर्वणि
C आदिपर्वणि
D द्रोणपर्वणि

48 अजविलापः रघुवंशे कस्मिन् सर्गे वर्तते ?

A द्वितीयसर्गे
B चतुर्थसर्गे
C अष्टमसर्गे
D पञ्चमसर्गे

49 तापसवत्सराजस्य कर्ता कः ?

A अनङ्गहर्षः
B मुरारिः
C विशाखदत्तः
D महेन्द्रविक्रमः

50 पदानां मिथः सम्बन्धे बाधाया अभावः किमुच्यते ?

A मित्रता
B योग्यता
C सत्यता
D काव्यता

51 अधोलिखितेषु अन्तरिक्षविज्ञानानुसन्धाने कः प्रसिद्धः ?

A पठाणिसामन्तः
B भासः
C विष्णुशर्मा
D पराशरः

52 वेदेषु गवेषणाशब्दस्य कोऽर्थः प्राप्यते ?

A शस्त्रान्वेषणम्
B आत्मान्वेषणम्
C शास्त्राण्वेषणम्
D गाभ्यन्वेषणम्

53 परंब्रह्मानुसन्दध्यात्” इति सूत्रं कुत्र वर्तते ?

A तैत्तिरीयोपनिषदि | B नृसिंहोत्तरतापिन्युपनिषदि

C बृहदारण्यकोपनिषदि | D मनुस्मृतौ

54 संस्कृतभाषासाहित्यक्षेत्रे अनुसन्धानस्य का प्रमुखावश्यकता स्यात् ?

A प्राचीनभारतीयसंस्कृतेः सभ्यतायाश्च प्रतिष्ठा

B संस्कृतशास्त्राणां मौलिकज्ञानवितरणम्

C संस्कृतशास्त्राणां संरक्षणम्

D संस्कृतशास्त्राणां सामाजिकसमस्यानिवारणायोपयोगः

55 प्राचीनानुसन्धातृमुनिषु वागायुर्योगवेत्ता कः ?

A वराहमिहिरः | B ब्रह्मगुप्तः

C पतञ्जलिः | D कालिदासः

56 अधोलिखितेषु अनुसन्धानस्य प्रकृष्टं लक्षणं किं स्यात् ?

A अनुपलब्धवस्तुनां लोकलोचनगोचरीकरणम्

B समुपलब्धानां तथ्यानां नवीनरूपेण नूतनसिद्धान्तैः उपस्थापनम्

C समस्यायाः सिद्धान्तैस्सह निवारणम्

D एतत्सर्वम्

57 विषयनिर्वाचने समुचितसामग्र्यभावात् शोधः कीदृशः भवितुमर्हति

A सफलः | B असम्पूर्णः भ्रमात्मको वा

C विलक्षणः | D समाजोपयोगी

58 समीक्षकस्य हाल्- महोदयस्य मतानुसारेण मातृकासु भ्रमाः कतिविधाः भवन्ति ?

A द्विविधाः | B त्रिविधाः

C चतुर्विधाः | D बहुविधाः

59 राष्ट्रस्य अतीतां घटनां, साहित्यं, संस्कृतिं वा समाश्रित्य नूतनतया
क्रियमाणमनुसन्धानं केन नाम्ना परिचितम् ?

A क्रियात्मकमनुसन्धानम् B ऐतिहासिकमनुसन्धानम्

C व्याख्यात्मकमनुसन्धानम् D किमपि न

60 व्याख्यात्मकः शोधः कीदृशः भवति ?

A विश्लेषणात्मकः B प्रयोगात्मकः

C तुलनात्मकः D सम्पादनात्मकः

61 अनुसन्धाननिमित्तमिदमपेक्षितम् -

A क्रमबद्धयोजनानिर्माणम् B मार्गदर्शनप्रदानम्

C आर्थिकमायोजनम् D पुस्तकालये उपवेशनम्

62 राष्ट्रियपाण्डुलिपिसंस्थायाः ध्येयवाक्यं किम् ?

A या विद्या सा विमुक्तये B तमसो मा ज्योतिर्गमय

C विज्ञानमुपास्व D मातृका रक्षत

63 भारतस्य संस्कृतपत्रिकाः पत्रकाराश्च इति कीदृशम् अनुसन्धानं भवितुमर्हति ?

A सर्वेक्षणम् B शास्त्रीयम्

C तुलनात्मकम् D क्षेत्रीयम्

64 “Research is a careful, systematic and objective investigation conducted to obtain valid facts, draw conclusions and established principles regarding an identifiable problem in some field of knowledge.” इति केन वैदेशिकेनोक्तम् ?

A Clarke and Clarke B Clifford Woody

C John W. Best D Martyn Shuttle Worth

65 पाठभेदादिसमीक्षा कदा क्रियते ?

A मातृकासम्पादने B आलङ्कारिकपर्यालोचनायाम्

C ग्रन्थकृदः व्यक्तित्वकृतित्वविचारे D दार्शनिकपरिशीलने

66 मातृकायाम् उल्लिखिता “ग्रहर्षिवियच्चन्द्राः” इति पङ्क्तिः कां संख्यां बोधयति ?

A 1079 B 1879

C 1179 D 6179

67 अनुसन्धाने विषयचयनसन्दर्भे किं न द्रष्टव्यम् ?

A अनुसन्धातुः बोधनक्षमता B अनुसन्धातुः विषयं प्रति प्रीतिः

C विषयं प्रति पाठकानामभिरुचिः D विषयं प्रति परेषां निन्दनम्

68 अन्तर्जाले अधोलिखितेषु किं Internet Searching Tool रूपेण नोपयुज्यते ?

A Google B Yahoo

C Bing D Whatsapp

69 महस्विनी" इति शोधपत्रिका कया संस्थया प्रकाश्यते ?

A तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन

B केन्द्रीयसंस्कृतिविश्वविद्यालयस्य राजीवगान्धिपरिसरेण

C श्रीजगन्नाथसंस्कृतविश्वविद्यालयेन

D सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन

70 अखिलभारतप्राच्यविद्यासम्मेलनं कया संस्थया क्रियते ?

A केन्द्रमानवसंवलविकासमन्त्रालयेन

B भण्डारकरप्राच्यविद्याऽनुसन्धानकेन्द्रेण

C सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन

D सिण्डिआ-प्राच्यविद्याकेन्द्रेण

71 "Oriental Research Institute (ORI) " कुत्र वर्तते ?

A केरले B ताञ्जावूरे

C मैशूरे D पुनेनगरे

72 भण्डारकरप्राच्यविद्यागवेषणाकेन्द्रात् प्रकाशितस्य महाभारतग्रन्थस्य सम्पादनायाम् अयं नास्ति ?

A सूक्तङ्करः B वेल्वल्करः

C दाण्डेकरः D पि.वि.काणे

73 National Manuscript Mission इति संस्थायाः प्रकाशनेषु एतन्नास्ति –

A कृतिबोधः B समीक्षिका

C तत्त्वबोधः D संस्कृतप्रतिभा

74 आधुनिकयुगे दर्शनशास्त्रानुसन्धानस्य काऽऽवश्यकता ?

A भोगाय B मोक्षाय

C भोगाय मोक्षाय च D न भोगाय न च मोक्षाय

75 बोरी (BORI) इत्यस्य सम्पूर्णं स्वरूपमिदम्?

A Bhandarkar Oriental Research Institute

B Bharatiya Oriental Research Institute

C Brahmasamaja Oriental Research Institute

D Babasaheb Oriental Research Institute

76 को नाम न्यायः ?

A स्वार्थानुमानम्    B परार्थानुमानम्

C पञ्चावयववाक्यम्    D उभयम्

77 न्यायमते न्यायवयवाः कति ?

A त्रीणि    B पञ्च

C दश    D सप्त

78 प्राचीनमते का नाम पक्षता ?

A साध्यसंशयः    B साध्यनिश्चयः

C साध्याभावनिश्चयः    D सिद्ध्यभावः

79 न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्त्वं कस्य लक्षणम् ?

A प्रतिज्ञायाः    B अवयवस्य

C हेतोः    D न्यायस्य

80 सूत्रकारमते साध्यनिर्देशः लक्षणं भवति ?

A प्रतिज्ञायाः    B उपनयस्य

C निगमनस्य    D साध्यस्य

81 हेत्वाभाससामान्यनिरुपणे का सङ्गतिः ?

A प्रसङ्गः    B एककार्यकारित्वम्

C अनुभयम्    D उभयम्

82 परिकरो नाम किम् ?

A व्याप्तिः    B पक्षधर्मता

C व्याप्तिपक्षधर्मते    D परामर्शः

83 प्रयोजकत्वम् नाम किम् ?

A जनकजनकतावच्छेदकरुपम् B कारणत्वम्

C जनकत्वम् D करणत्वम्

84 विशिष्टद्वयाघटित्वमस्मिंल्लक्षणे उक्तम् ?

A प्रथमे B द्वितीये

C तृतीये D न कुत्रापि

85 विशिष्टान्तराघटितत्वमित्यत्र अन्तरपदस्य अर्थः कः ?

A भिन्नार्थकम्

B अभिन्नार्थकम्

C नोभयात्मकम्

D स्वावच्छिन्नाविषयकप्रतीतिविषयात्मकम्

86 तात्पर्यज्ञानमत्र कारणम् ?

A शब्दबोधसमामान्ये B नानार्थकपदबोधे

C लाक्षणिकबोधे D न कुत्रापि

87 पदम् कतिविधम् ?

A द्विविधम् B चतुर्विधम्

C पञ्चविधम् D षड्विधम्

88 न्यायमते शक्तिर्नाम का ?

A परिभाषा B आधुनिकपरिभाषा

C वाच्यवाचकभावरूपा D ईश्वरसङ्केतः

89 वेदनित्यत्ववादिनः के ?

A मीमांसकाः B नैयायिकाः

C बौद्धाः D न कोऽपि

90 योग्यता नाम किम् ?

A लक्षणाबाधः B लक्ष्याबाधः

C अर्थाबाधः D आसत्त्यबाधः

91 स्मृतिलक्षणे मात्रपदानुपादानेऽतिव्याप्तिः कुत्र ?

A संस्कारे B अनुमितौ

C प्रत्यभिज्ञायाम् D शब्दे

92 एकयोकत्या पुष्पवन्तौ दिवाकरनिशाकरौ इत्यत्र उक्तिपदार्थः कः ?

A शक्तिः B लक्षणा

C वचनम् D गौणी

93 कार्यान्विते शक्तिरिति कस्मिन् मते ?

A न्यायमते B मीमासकमते

C वेदान्तिनां मते D सांख्यमते

94 घटोघटः इत्यत्र कीदृशः शब्दबोधः ?

A अभेदसंसर्गकबोधः B भेदबोधः

C अभेदप्रकारकबोधः D न बोधः

95 सिद्धान्ते राजपुरुषः इत्यत्र कीदृशः बोधः ?

A अभेदबोधः B न बोधः

C स्वत्वप्रकारकबेधः D स्वत्वसंसर्गकबोधः

96 संसर्गमर्यादा नाम का ?

A आकांक्षा B तात्पर्यम्

C योग्यता D न किमपि

97 प्रमायाः परतस्त्वं के स्वीकुर्वन्ति ?

A नैयायिकाः B मीमांसकाः

C वैयाकरणाः D सांख्याः

98 ख्यातिः कतिविधा ?

A त्रिविधा B पञ्चविधा

C बहुविधा D चतुर्विधा

99 न्यायमते प्रमाणानि कति ?

A पञ्च B चत्वारि

C त्रीणि D षट्

100 निःश्रेयसं न्यायमते किं रूपम् ?

A दुःखरूपम्

B सुखरूपम्

C दुःखात्यन्ताभावरूपम्

D चरमदुःखध्वंसरूपम्

ANSWER KEY

Ph.D in Nyaya

| *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY |
|---|---|---|---|---|---|---|---|
| 1 | A | 26 | B | 51 | A | 76 | C |
| 2 | B | 27 | D | 52 | D | 77 | B |
| 3 | B | 28 | C | 53 | B | 78 | A |
| 4 | A | 29 | B | 54 | D | 79 | B |
| 5 | B | 30 | C | 55 | C | 80 | A |
| 6 | B | 31 | C | 56 | D | 81 | D |
| 7 | A | 32 | B | 57 | B | 82 | C |
| 8 | A | 33 | C | 58 | B | 83 | A |
| 9 | B | 34 | B | 59 | B | 84 | B |
| 10 | B | 35 | A | 60 | A | 85 | D |
| 11 | C | 36 | C | 61 | A | 86 | A |
| 12 | A | 37 | B | 62 | C | 87 | B |
| 13 | A | 38 | C | 63 | D | 88 | D |
| 14 | C | 39 | C | 64 | A | 89 | A |
| 15 | A | 40 | A | 65 | A | 90 | C |
| 16 | C | 41 | C | 66 | A | 91 | C |
| 17 | C | 42 | C | 67 | D | 92 | A |
| 18 | B | 43 | B | 68 | D | 93 | B |
| 19 | A | 44 | C | 69 | A | 94 | D |
| 20 | A | 45 | C | 70 | B | 95 | C |
| 21 | A | 46 | D | 71 | C | 96 | A |
| 22 | D | 47 | C | 72 | D | 97 | A |
| 23 | D | 48 | C | 73 | D | 98 | A |
| 24 | C | 49 | A | 74 | C | 99 | B |
| 25 | A | 50 | B | 75 | A | 100 | D |